

# Yoga Sara Sri Vishnu Stuti - Padma Puranam

## ॥ योगसार श्रीविष्णु स्तुतिः - पाद्म पुराणम् ॥

The following is an exquisite hymn on **Lord Vishnu** titled **Yoga Sara Vishnu Stuti** from **Padma Purana**, **Uttara Khanda**, **Chapter 129** as part of **Magha Mahatmya**. The hymn was given to **King Dilipa** by **Sage Vasishta** while explaining the greatness of **Magha** (the month of mAgha).

By the name of the Stuti, it can be interpreted that this hymn on Lord Vishnu contains the essence of all **Yogas**. Alternatively or concomitantly, it could also be that this is a very sacred hymn on Lord Vishnu who is indeed the essence of all Yogas. This is because the hymn contains delineation of how Lord Vishnu is worshipped by various entities in spiritual pursuit by portraying Him as the subject as well as the object of all Yogas and Yogic pursuits.

Though this hymn is very rare, it is indeed a gem and one can understand this from the very detailed **Phalashruti** (efficacies of chanting this hymn) whose brief is given below:

- One who chants or listens to this hymn gets the benefit of performing **Ashwamedha Yajna** and the benefit of donating thousands of cows or vessels containing sesame seeds.
- This hymn is capable of bestowing **Atma Vidya** (knowledge leading to self-realization) and prevents mind from wandering into sins and sinful activities/thoughts and bestows steadiness/control over mind, intellect and senses.
- One who chants this hymn never faces any inauspicious experiences or sights at attains **Vishnu Padam**. It also makes one follow spiritual pursuits with righteousness and humility.
- One who chants this hymn gets all rightful desires fulfilled including progeny, cattle, long life, valor, spouse and the four **Purusharthas**.
- Even if one had committed the worst of the sins, he becomes purified by chanting this hymn.
- One who chants this hymn sees his wealth such as **prajnA** (consciousness), comforts, fame, knowledge and righteousness greatly enhanced.
- Planetary/stellar afflictions, inauspicious occurrences, diseases, misfortunes, fear from government/fire/theft/ferocious animals/spirits, etc. get destroyed by chanting this hymn.
- One who chants this hymn once, twice or thrice a day gets the benefit of performing ablation at the holy river Ganga and chanting four Vedas in 3 nights.
- One who chants this hymn gets non-depletable wealth and comforts and bestows **Vishnu Prasada** and **Vishnu Darshana** (Divine Vision) and ultimately leads the person to **Vishnu Loka**.

दिलीप उवाच -

महर्षे ऽ नुगृहीतोस्मि कथया पावनी कृतः ।
अनया विष्णु सङ्गत्या गङ्गयेवाहमद्य वै ॥ १ ॥

किं तत् स्तोत्रं आख्याहि प्रसन्नो येन माधवः ।
तस्या ऽ नघस्य विप्रस्य महत् कौतूहलं मम ॥ २ ॥

तत् प्रसादाद् अहं विप्र मन्ये प्राप्तं मनोरथम् ।
महतां सङ्गतिः कस्य महत्त्वायन कल्पते ॥ ३ ॥

कथयस्व प्रसादेन विष्णो स्तोत्रमनुत्तमम् ।
येन तुष्टः स भगवान् ददौ तस्य च दर्शनम् ॥ ४ ॥

वसिष्ठ उवाच -

कथयामि रहस्यं ते यज् जप्तं स्तोत्रं उत्तमम् ।
प्राग् गृहीतं सुपर्णेन गरुडान् मयि चाऽगतम् ॥ ५ ॥

अध्यात्म गर्भ सारं तन् महोदय करं शुभम् ।
सर्व पाप हरं भूप स्वात्म ज्ञान करं परम् ॥ ६ ॥

## ॥ स्तोत्रम् ॥

ॐ नमो वासुदेवाय नमो विश्वाय चक्रिणे ।
भक्त प्रियाय कृष्णाय जगन्नाथाय शाङ्र्गिणे ॥ १ ॥

स्तोता स्तुत्यः स्तुतिः सर्वं जगद् विष्णु मयं यदा ।
तदा संस्तूयते केन भक्तिर् मोदकरी नृणाम् ॥ २ ॥

यस्य देवस्य निःश्वासो वेदाः साङ्गाः ससूत्रकाः ।
का स्तुतिः प्रमुदे तस्य भक्त्याहं मुखरोभवम् ॥ ३ ॥

चक्रवद्धमते सर्वं त्रैलोक्यं सचराचरम् ।
अतस् त्वं गीयते देव चक्रपाणि वरायुध ॥ ४ ॥

वेदो न वक्ति यं सक्षान् न च वाग् वेत्ति नो मनः ।
मद्विधस् तं कथं स्तौमि भक्तिमान् वा कथं भवेत् ॥ ५ ॥

ब्रह्मादि ब्रह्म विष्णुस् त्वं त्वमेव सकलाश्रयः ।
स्रष्टा ब्रह्म निदानं च शुद्धं ब्रह्मत्वं एव च ॥ ६ ॥

कोयं कायस् तव विभो भित्त्वा स्पृशति कायिनम् ।
काय दोषैर् न चाऽघ्रातस् तस्मै नमोऽस्तु योगिने ॥ ७ ॥

देव भावेन जागर्ति न निद्राति निजात्मनि ।
सुख सन्दोह बुद्धिर् या सा त्वं विष्णो न संशयः ॥ ८ ॥

महदादयो महाभावास् तथा वैकारिका गुणाः ।
त्वमेव नाथ तत् सर्वं नाना त्वं मूढ कल्पना ॥ ९ ॥

केश केशव रूपाभिः कल्पनातिसृभिस् तथा ।
त्वमेव कल्पसे ब्रह्म पुमान् इव सुतादिभिः ॥ १० ॥

विदोषं विगुणं चैकं चिन्मूर्तिर् अखिलं जगत् ।
कवीनां भाति यत् तत्त्वं विष्णुं नौमि निर्मलम् ॥ ११ ॥

यस्य ज्ञानेन कुर्वन्ति कर्माणि श्रुति भाषितम् ।
निरीषणा जगन् मित्राः शुद्धं ब्रह्म नमामि तत् ॥ १२ ॥

ध्वस्तेतरञ् च सन्मात्रं यत् प्रबोधाद् उपासते ।
योगिनः सर्व भूतेषु सद्रूपं नौमि तं हरिम् ॥ १३ ॥

ब्रह्माहं इति गायन्ति यज्ञात् वै कं वराद्विजाः ।
पश्यन्तो हि त्वया तुल्यं देवं तं नौमि माधवम् ॥ १४ ॥

मायया मोह वैचित्र्यं तथाहं ममतां नृणाम् ।
यो नाशयति पापौघान् नमस्तस्मै चिदात्मने ॥ १५ ॥

प्रयाणे वा ऽ प्रयाणे च यन् नाम स्मरतां नृणाम् ।
सद्यो नश्यन्ति पापौघान् नमस्तस्मै चिदात्मने ॥ १६ ॥

मोहाऽनल लसज् ज्वाला ज्वलल् लोकेषु सर्वदा ।
यत् पादांभोरुहच् छायां प्रविष्टश् च न दह्यते ॥ १७ ॥

यस्य स्मरण मात्रेण मोहो नैव दुर्गतिः ।
न रोगानैव दुःखानि तं अनन्तं नमाम्यहम् ॥ १८ ॥

कामयन्ते प्रजानैव धिषणाभ्यः समुत्थिताः ।
लोकं आत्मैव पश्यन्ति यं बुद्ध्वैक चरा जनाः ॥ १९ ॥

शब्दार्थः संविद् अर्थश् च विष्णोर् नाम परो यदि ।
सत्येन तेन संसारो मा संस्पृशतु माधव ॥ २० ॥

नारायणो जगद् व्यापी यदि वेदादि सम्मतः ।
सत्येन तेन निर्विघ्ना विष्णुर् भक्ति ममास्तु वै ॥ २१ ॥

यो न बीजं विना बीजं बीजे यो बीज भावितः ।
स विष्णुर् भवबीजं मे सितविद्यासिनाद्यतु ॥ २२ ॥

त्रितनुर् नटवद्यस् तु सृष्टि स्थिति लयेषु च ।
गुणैर् भवति कार्येषु स प्रसीदतु मे हरिः ॥ २३ ॥

दशधेहावतीर्णो यो धर्म त्राणाय केवलम् ।
अभ्यर्थितः सुरैः सर्वैः स प्रसीदतु मे हरिः ॥ २४ ॥

ब्रह्मादिस्तम्ब पर्यन्तं प्राणि हृन् मन्दिरे ऽ मलः ।
एको वसति यो देवः स प्रसीदतु मे हरिः ॥ २५ ॥

इच्छां चक्रे स देवाग्रे एकश् चैव बहुस् तथा ।
प्रविष्टो देवताः स्रष्टा स प्रसीदतु मे हरिः ॥ २६ ॥

हृत् खगः खसमः खादिः खातीतः खक्रियः खगः ।
खंब्रह्मा खादिभुक् चाऽन्ते खमूर्तिस् त्वं मखाशनः ॥ २७ ॥

यद् भासा यन् मुदा यस्य मायया सज्यते जगत् ।
जाड्यं दुःखमसत्यं च स भवान् एव तन्मयः ॥ २८ ॥

त्वत् सृष्टं मोदते विश्वं त्वत् त्यक्तमशुचिभिर् भवेत् ।
तत् सङ्गतोप्य सङ्गस् त्वं विकारस् तेन तेन हि ॥ २९ ॥

भूत योगज चैतन्यं चाऽर्वाकायं उपासते ।
सौगता ब्रुवते तर्कैस् त्वां बुद्धिं क्षण भुङ्गुराम् ॥ ३० ॥

शरीर परिमाणं त्वां मन्यन्ते जिन देवताः ।
ध्यायन्ति पुरुषं साङ्ख्यास् त्वामेव प्रकृतेः परम् ॥ ३१ ॥

जन्मादि रहितः पूर्वं यः स्याद् आनन्द लक्षणम् ।
त्वामेवोपनिषद् ब्रह्म चिन्तयन्ति परस्परम् ॥ ३२ ॥

खादि भूतानि देहश् च मनो बुद्धीन्द्रियाणि च ।
विद्याऽविद्येत्वमेवाऽत्र नान्यत् त्वत्तोऽस्ति किञ्चन ॥ ३३ ॥

त्वं धाता सर्व भूतानां त्वमेव शरणं मम ।
त्वं अग्निस् त्वं हविः शक्रो होता मन्त्रः क्रिया फलम् ॥ ३४ ॥

त्वं अस्ति नास्ति वैकुण्ठ त्वामहं शरणं गतः ।
त्वं कर्म फल दाता च दीक्षितानां क्रिया फलम् ॥ ३५ ॥

त्वं हेतुः सर्व भूतानां त्वमेव शरणं मम ।
युवतीनां यथा यूनि यूनां च युवतौ यथा ॥ ३६ ॥

मनोभिरमते तद्वत् प्रीतिर् मे रमतां त्वयि ।
अपि पापं दुराचारं नरं त्वत् प्रणतं हरे ॥ ३७ ॥

नेक्षन्ते किं करायाम्य उलूकास् तपनं यथा ।
ताप त्रयमघाचैश्च तावत् पीडयते जनम् ॥ ३८ ॥

यावत् स्मरति नो नाथ भक्त्या त्वत् पाद पङ्कजम् ॥ ३९ ॥

यं न स्पृशन्ति गुण जाति शरीर धर्मा
यं न स्पृशन्ति गतयस् त्वाखिलोन्द्रियाणम् ।
यं च स्पृशन्ति मुनयो गत सङ्गमोहास्
तस्मै नमो भगवते हरये करोमि ॥ ४० ॥

स्थूलं विलाप्य करणे करणं निदाने
तत्कारणं करण कारण वार्जिते च ।
इत्थं विलाप्य मुनयः प्रविशन्ति तत्र
तस्मै नमोऽस्तु हरये मुनि सेविताय ॥ ४१ ॥

यद् ध्यान संवहन घूर्ण वशीकृतां तां
ऐश्वर्य चारु गुणिनीं सुख मोक्षलक्ष्मीम् ।
आलिङ्ग्यशे रत इहात्म सुखैक भाजस्
तस्मै नमोऽस्तु हरये मुनि सेविताय ॥ ४२ ॥

जन्मादि भाव विकृतेर् विरह स्वभावे
यस्मिन्नयं परिधुनोति षडूर्मि वर्गः ।
यं तापयन्ति न सदा मदनादि दोषास्
तं वासुदेवं अमलं प्रणतोऽस्मि हार्दम् ॥ ४३ ॥

यद् ध्यान सङ्गतमलं विजहात्य विद्यां
यद् ध्यान वह्नि पतितं जगदेतिनाशम् ।
यज् ज्ञानमुल्लसद सिद्यति संशयारिं
तं त्वां हरिं विशादि बोध घनं नमामि ॥ ४४ ॥

चराचराणि भूतानि सर्वाणि च हरेर् वशे ।
यथात्र तेन सत्येन पुरस् तिष्ठतु मे हरिः ॥ ४५ ॥

यथा नारायणः सर्वं जगत् स्थावर जङ्गमम् ।
तेन सत्येन मे रूपं प्रदर्शयतु केशवः ॥ ४६ ॥

भक्तिर् यथा हरौ मेऽस्ति तद् वरिष्ठा गुरौ यदि ।
ममाऽस्ति तेन सत्येन स्वं दर्शयतु केशवः ॥ ४७ ॥

तस्यै वंश पथैः सत्यैर् भक्तिं तस्या ऽ नुचिन्तयन् ।
दर्शयामास चाऽत्मानं स प्रीतः पुरुषोत्तमः ॥ ४८ ॥

## ॥ फल श्रुतिः ॥

ततो दत्त्वा वरं तस्य पूरयित्वा मनोरथम् ।
जगाम कमलाकान्तः स्तुत्या विप्रेण तोषितः ॥ १ ॥

कृत कृत्यो द्विजः सोऽपि वासुदेव परायणः ।
शिष्यैः सार्ध जपन् स्तोत्रं तस्मिन्नास्ते तपोवने ॥ २ ॥

कीर्तयेऽद्य इदं स्तोत्रं शृणुयाद् योऽपि मानवः ।
अश्वमेधस्य यज्ञस्य प्राप्नोति विपुलं फलम् ॥ ३ ॥

आत्म विद्या प्रबोधं च लभते ब्राह्मणः सदा ।
न पापे जायते बुद्धिर् नैव पश्यन्त्यमङ्गलम् ॥ ४ ॥

बुद्धि स्वास्थ्यं मनः स्वास्थ्यं स्वास्थ्यं ऐन्द्रियकं तथा ।
नृणां भवति सर्वेषां अस्य स्तोत्रस्य कीर्तनात् ॥ ५ ॥

विचार्यार्थं जपेद् यस्तु श्रद्धया तत्परो नरः ।
स विधूयेह पापानि लभते वैष्णवं पदम् ॥ ६ ॥

लभते वाञ्छितान् कामान् पुत्र पौत्रान् पशूंस् तथा ।
दीर्घमायुर् बलं वीर्यं लभते स सदा पठन् ॥ ७ ॥

तिल पात्र सहस्रेण गो सहस्रेण यत्फलम् ।
तत्फलं समवाप्नोति य इमां कीर्तयेत् स्तुतिम् ॥ ८ ॥

धर्माऽर्थ काम मोक्षाणां यं यं कामयते सदा ।
आचिरात् तमवाप्नोति स्तोत्रेणानेन मानवः ॥ ९ ॥

आचारे विनये धर्मे ज्ञाने तपसि सन्नये ।
नृणां भवति नित्यं धीर् इमां संशृण्वतां स्तुतिम् ॥ १० ॥

महापातक युक्तो वा युक्तो वा ह्युपपातकैः ।
सद्यो भवति शुद्धात्मस् स्तोत्रस्य पठनात् सकृत् ॥ ११ ॥

प्रज्ञालक्ष्मीर् यशः कीर्तिं ज्ञान धर्म विवर्धनम् ।
दुष्ट ग्रहोपशमनं सर्वाऽशुभ विनाशनम् ॥ १२ ॥

सर्व व्याधि हरं पथ्यं सर्वाऽरिष्ट निषूदनम् ।
दुर्गतेस्तरणं स्तोत्रं पठितव्यं द्विजातिभिः ॥ १३ ॥

नक्षत्र ग्रह पीडासु राज चोर भयेषु च ।
अग्नि चोर निपातेषु सद्यः सङ्कीर्तयेद् इदम् ॥ १४ ॥

सिंह व्याघ्र भयं नाऽस्ति नाऽभिचार भयं तथा ।
भूत प्रेत पिशाचेभ्यो राक्षसेभ्यस् तथैव च ॥ १५ ॥

पूतना जृंभकेभ्यश् च विघ्नेभ्यश् चैव सर्वदा ।
नृणां क्वचिद् भयं नास्ति स्तवे ह्यस्मिन् प्रकीर्तिते ॥ १६ ॥

वासुदेवस्य पूजां यः कृत्वा स्तोत्रं उदीरयेत् ।
लिप्यते पातकैर् नाऽसौ पद्म पत्रमिवांभसा ॥ १७ ॥

गङ्गादि पुण्य तीर्थेषु या स्नानैर् नाऽप्यते गतिः ।
तां गतिं समवाप्नोति पठन् पुण्यं इमां स्तुतिम् ॥ १८ ॥

एककालं द्विकालं वा त्रिकालं वाऽपि यः पठेत् ।
सर्वदा सर्व कालेषु सोऽक्षयं सुखमश्नुते ॥ १९ ॥

चतुर्णां अपि वेदानां त्रिरावृत्या च यत्फलम् ।
तत्फलं लभते स्तोत्रं अधीयानः सकृन् नरः ॥ २० ॥

अक्षय्यं धनं आप्नोति स्त्रीणां भवति वल्लभः ।
पूजां विन्दति लोकेऽस्मिंच् छ्रद्धया संस्मरन् हरिम् ॥ २१ ॥

सर्वदा संपदा युक्तो विपदं नैव गच्छति ।
गोभिर् नन्हियते स्तोत्रं नित्यं यः कीर्तयेद्धि यत् ॥ २२ ॥

अलक्ष्मी कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम् ।
सद्यो नश्यन्ति भक्तानां एतं संशृण्वतां स्तवम् ॥ २३ ॥

प्रातरुत्थाय योऽधीते शुचिर् विष्णु परायणः ।
अक्षय्यं लभते सौख्यं इह लोके परत्र च ॥ २४ ॥

देव द्युति प्रणितं वै विष्णु प्रीतिकरं शुभम् ।
विष्णु प्रसाद जननं विष्णु दर्शन कारकम् ॥ २५ ॥

योगसारं इदं नाम स्तोत्रं परम पावनम् ।
यः पठेत् सततं भक्त्या विष्णुलोकं स गच्छति ॥ २६ ॥

इति ते कथितं स्तोत्रं गुह्यं पाप प्रणाशनम् ॥ २७ ॥

---

॥ इति श्रीपाद्मे पुराणे पञ्च पञ्चाशत् साहस्र्यां संहितायां
उत्तर खण्डे माघ माहात्म्ये वसिष्ठ दिलीप संवादे
योगसार श्रीविष्णु स्तोत्रं सम्पूर्णम् ॥